MSS No. 140 Subject Religion

Name of MSS पंचलक्षणी

Author – –

Period – – Folios 022 (001 to 011+012)

Script Sanskrit Source Prithipal Singh

Missing Folios 11a

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः नतावदव्यभिचरितत्वं नसाध्याभाववदवृत्तित्वं १ साध्यवद्भिन्न वद्
साध्याभाववदवृत्तित्वं २ साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं ३ सकलसाध्याभाव
वन्निष्ठाभावप्रतियोगित्वं ४ साध्यवदन्यावृत्तित्वं वा ५ केवलान्वयिन्यभावात्

140

[illegible]

ॐ अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपं निरूपयितुमारभते नन्वित्यादिना अनुमि
१ म तिहेत्वित्यस्यानुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यर्थः व्याप्तिज्ञानेत्यत्र च विष
यत्वसप्तम्यर्थः तथा चानुमाननिष्ठप्रामाण्यानुमितिहेतुव्याप्तिज्ञानविषयी
भूता व्याप्तिः केत्यर्थः अनुमाननिष्ठप्रामाण्यानुमितिहेतुत्वेन व्याप्तेः स्व
मानप्रामाण्योपपादकत्वकथनात् अनुमानप्रामाण्यनिरूपणानंतरं
व्याप्तिनिरूपणे उपोद्घात एव संगतिरिति सूचितं उपपादकतानिरूपकत्व
केचित्तु अनुमितिपदं अनुमितिनिष्ठेतरभेदानुमितिपरम् तथा चानुमि
तिनिष्ठेतरभेदानुमितौ यो हेतुः प्रागुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञान
रूपज्ञानत्वरूपः तद्घटकं पदं व्याप्तिज्ञाने तद्देशो विशेषणीभूता व्याप्तिः के
त्यर्थः घटकत्वार्थकसप्तम्यास्तदनुरूपसमासात् तथा च प्रागुक्तावभि: १

३ [illegible]

त्रिलक्षणोपि पादद्यानेः एवं संगतिरनेन सूचिता इत्याहुः नतावदिति नाव्याप्यसंस्कारे अ
व्यभिचरितत्वम् अव्यभिचरितत्वस्यैव प्रतिपाद्यत्वात् तत्रेहेतुमाह तद्धीत्यादिना न अव्यभि
चरितत्वं एतत्प्रतिपाद्यं हि यस्मादेषां पञ्चानां व्याप्तियत्नः साध्याभाववदवृत्तित्वादिरूपाणां अ
व्यभिचरितत्वं एतत्प्रतिपाद्यानुरत्यर्थः पर्यवसितं विशेषाभावकूटस्य सामान्याभावहेतु
त्वात् प्रसिद्धत्वेति अत एव न नमह्न्णोपादानमतप्रकमितिध्येयम् तत्र अव्यभिचरितत्वं नेति
सर्वज्ञलक्षणोपमवध्यते साध्याभाववदवृत्तित्वमिति वर्त्तेनेहन नमो वेदनिष्ठा प्रत्ययः तत्सा
भावो अवृत्तित्वं तामान्यइति यावत् साध्याभाववतो वृत्तेः साध्याभाववं अव्यभिचरितत्वं न स
ध्याभाववदवृत्तित्वादिरूपं केवलान्वयिन्यभावात् अतोऽव्यभिचरितत्वस्य उक्तरूपतया
न व्याप्तित्वरूपत्वमित्यर्थः दृष्टं साध्याभाववद्वृत्तित्वं वृत्तिर्यावत् स यत्रास्तीति साध्याभा
ववद्वृत्तीमत्वर्थीयेन प्रत्ययात् तदभावः साध्याभाववदवृत्तित्वं तच्च साध्या

२ भाववहुत्वाभाववत्त्वमिति फलितमिति प्राग्वत्तदसत् नकर्मधारयान्मत्वर्थीयो बहुव्रीहिस्त्वनर्थ
प्रतिपत्तिकरत्वादनुशासनविरोधात् तत्र कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वात्तत्त्वा
गत्वरत्वमितिसाधव्याप्यतानावसरे गुणश्च कापाम्हस्येदीधितिरहस्ये चस्फुटम् अ
व्ययीभावसमासोत्तरपदार्थेन समं तत्समासानिविष्टपदार्थान्वयस्याव्युत्पन्नत्वा
च भूतलोपकुम्भं भूतलाघटमित्यादौ भूतलवृत्तित्वस्य समीपतदत्यन्ताभावयोरप्रतीतेः
एतेन वह्नेरभावोऽग्न्यनीत्यव्ययीभावानन्तरं साध्याभाववत्त्वोऽहन्नियत्वेनवहुव्रीहिरित्यपि प्र
युक्तं हेत्वौ साध्याभाववत्त्वोऽनन्वयापत्तेः अव्ययीभावसमासस्याव्ययत्वनपात्वेन समस
मासान्तरासंभवाच्च नन्वनुपाध्यादिरूपाव्ययविशेषणानामेव समस्य मानत्वेन प्रवी
णत्वीतत्वात् वस्तुतस्तु साध्याभाववत्तो न हेत्वन्तर्भवेति त्रिपदवहुव्रीहिरनन्तरं त्व प्रत्ययः २

साध्याभाववतोऽवृत्तिनिरूपितत्वम् षष्ठ्यर्थः अन्वयश्चास्य वृत्तौ तत्र च साध्याभावाधिकरणनि
रूपितवृत्त्यभाववत्त्वमव्याप्तिः वह्निमान्धूमादिति फलितार्थः न च व्यधिकरणबहुव्रीहिः सर्वत्रा
साधुरिति वाच्यम् अत्र एव हेतुः साध्याभाववद्वृत्तिर्नास्त्यादौ व्यधिकरणबहुव्रीहिं विना गतं
तत्सम्भवेन व्यधिकरणबहुव्रीहेः साधुत्वात् साध्याभावाधिकरणवृत्त्यभावश्च ता
दृशवृत्तित्वसामान्याभावो बोध्यः तेन धूमवान्वह्नेरित्यादौ धूमाभाववज्जलहृदा
दिवृत्त्यभावस्य धूमाभाववद्वृत्तित्वेन तत्तद्व्यक्तित्वावच्छिन्नाभावस्य च वह्नौ सत्त्वेऽपि
नातिव्याप्तिः वृत्तिश्च हेतुतावच्छेदकसंबन्धेन विवक्षणीया तेन च समवायेन वह्नेः सा
वयवे जलहृदादौ समवायकालिकविशेषणतादिना धूमस्य वृत्तावपि नातिव्याप्तिः सा
ध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगि

२

गितांकोत्वंवह्निमाह्नानेन वह्निमान् धूमादित्यादौ समवायसम्बन्धेन वह्निसामान्याभावव
ति संयोगसम्बन्धेन वह्नेर्वह्निलत्वोभयत्वाद्यवच्छिन्नाभाववति च पर्वतादौ संयोगेन धू
मसत्त्वान्नाव्याप्तिः ननु नैयायिकगणत्वावच्छिन्नज्ञानत्वान् सत्त्ववान् ज्ञानत्वादित्यादौ वि
षयिताख्यापत्तादिसम्बन्धेन नाहृपासाध्याभाववृत्तित्वान् ज्ञानत्वादौ ज्ञानत्वनात्यादेर्वसमा
नत्वादव्याप्तिः न च साध्याभावाधिकरणत्वमभावीयप्रतियोगितावच्छेदकतानिरूपकत्वविवक्षितमि
तिवाच्यं तथापि घटत्वाद्यवच्छिन्नाभाववान् पटत्वादित्यादौ साध्याभाववत्घटत्वादेर्विशे
षणतानविशेषणाऽधिकरणत्वाप्रसिद्धेरव्याप्तिरिति चेन्न साध्यतावच्छेदकसम्बन्धावच्छि
न्नप्रतियोगिताकसाध्याभाववृत्ति साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धे
न साध्याभावाधिकरणत्वस्य विवक्षणीयत्वात् तन्मन्तं प्रतियोगितानविशेषणसाम त्ता
हसंबंधः वह्निमान् धूमादित्यादौ भावसाध्यकस्थले विशेषणतानविशेषणस्वरूपत्वा

३

भाववान् घटत्वादित्यादावभावसाध्यकस्थले समवायादिरेव समवायविषयि
त्वादिसम्बन्धेन प्रमेयादिसाध्यकज्ञानत्वादिहेतौ साध्यतावच्छेदकसमवायादि
सम्बन्धावच्छिन्नप्रमेयाद्यभावस्य कालिकादिसम्बन्धेन योऽभावस्सोऽपि प्रमेयत्व
यसाध्यान्तर्गतः तदीयप्रतियोगितावच्छेदककालिकादिसम्बन्धेन साध्याभा
वाधिकरणे ज्ञानत्वादेर्हेतोरव्याप्तिवारणाय सामान्यपदोपादानम् साध्यसा
मान्यीयत्वं च यावत्साध्यनिरूपितत्वं स्वाभिन्नरूपकसाध्यकभिन्नत्वमिति यावत्
अत्र स्वकोऽज्ञिमात्रतयाऽगौरवस्यादोषत्वात् कारणतावच्छेदकेऽभावसाध्यकस्थलेऽभावीयवि
शेषणताविशेषेण साध्याभावाधिकरणत्वम् अभावसाध्यकस्थले यथायथं सम
वायादिसम्बन्धेन साध्याभावाधिकरणत्वमपादेयं साध्यभेदेन कार्यकारणभाव
भेदात् न च तथापि हृदन्योन्याभाववान् घटत्वात् इत्यत्रान्योन्याभावादिसाध्यके द्र
व्यत्वादिरूपे साध्याभावेन साध्यप्रतियोगित्वम् नवा समवायादिसम्बन्धस्तदवच्छे

दकस्तादात्म्यस्यैव नदवच्छेदकत्वादित्यापि लदवस्येतिवाच्यम् अत्यंताभावाभावस्य प्रति
४ योगिरूपत्वेन घटभेदस्य घटभेदात्यंताभावत्वावच्छिन्नसमवायसंबंधावच्छिन्नप्रतियोगि
ताकाभावरूपतया घटभेदात्यंताभावरूपस्य प्रतियोगितावच्छेदकीभूतघटत्वस्यापि समवा
यसम्बन्धेन घटभेदप्रतियोगित्वात् न चान्यजात्यंताभावाभावस्य प्रतियोगिरूपत्वेपि घ
टादिभेदात्यंताभावाभावो न घटादिभेदरूपः किन्तु प्रतियोगितावच्छेदकीभूतघटत्वात्य
न्ताभावरूप एवेति सिद्धान्त इति वाच्यम् यथा हि घटत्वावच्छिन्नघटवत्यत्रेह घटात्यंताभा
वाव्यवहारात् घटात्यंताभावाभावव्यवहारश्च घटात्यंताभावाभावो घटस्वरूपः न चैवं घटभेदवत्यत्रेह
घटभेदात्यंताभावाव्यवहारात् घटभेदात्यंताभावाभावव्यवहारश्च घटभेदात् एवं घटभेदात्यंताभा
वत्वावच्छिन्नप्रतियोगिताकाभाव इति न तत्सिद्धान्तेन युक्तिसहः किंतु गमकाभावेनापि घटत्व
स्य घटत्वात्वावच्छिन्नप्रतियोगिताकात्यंताभावाभावत्ववद् घटभेदस्यापि घटभेदात्यं ४
ताभावाभावत्वसिद्धेः प्रत्यक्षत्वाच्च नैव तादृशः सिद्धान्तो नोपाध्यायसंमतः अतएव वाभाव

विरहात्मत्वम् वस्तुनः प्रतियोगितारत्नाचार्यः अन्यथा घटभेदात्यन्ताभावः प्रतियोगिनि घटभे
देन घटत्वलक्षणस्या व्याप्तेः अन्योन्याभावप्रतियोगितावच्छेदकेन तल्लक्षणस्यातिव्याप्त्यापत्ते
एवं नैवम् घटत्वावच्छिन्नप्रतियोगिताकघटभेदाभावस्यापि घटभेदस्वरूपतापत्ति
रिति वाच्यम् तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव तत्स्वरूपताभ्युपगमा
त् न तु तादृशहेतुमदत्यन्ताभावाभावस्यैव व्यावर्तकतदुपाधौ घटत्वेनावच्छिन्नप्रतियोगिता
कघटभेदात्यन्ताभावस्यापि घटभेदस्वरूपताभ्युपगमात् नैवम् साध्यसामान्यीयप्रतियो
गितावच्छेदकसम्बन्धेन व साध्याभावाधिकरणत्वं विवक्षितम् किं साध्यतावच्छेदकसम्बन्धा
वच्छिन्नसाध्याभाववद्वृत्तित्वस्य प्रतियोगितावच्छेदकत्वेनेति वाच्यम् कालिकसम्बन्धावच्छि
न्नस्यात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य विशेष्यतानवच्छेदकसाध्यत्वे आत्मत्वादिहेतौ
अव्याप्त्यापत्तेः कालिकादिसम्बन्धावच्छिन्नसाध्याभावस्य विशेष्यतानवच्छेदकसम्बन्धेन पोऽन्यता
भावस्यापि साध्यरूपतया कालिकसम्बन्धावच्छेदविशेष्यतानवच्छेदकत्वेऽपि साध्यीयप्रतियोगि

८

तावच्छेदकसंबन्धः तेन संबन्धेन साध्यतावच्छेदकप्रकारकप्रमाविशेष्यत्वरूपसाध्याभाववत्ति ज्ञानमिति हे
तोरन्यतमत्वस्य वृत्तेः प्रतियोगितावच्छेदकत्वात् प्रतियोग्यवृत्तिरन्योन्याभावाभावः तेन नादस्य स
त्त्वेनैव साध्यतायां साध्यतावच्छेदका वृत्तित्वं साध्याभाववद्वृत्तिः साध्यीयप्रतियोगित्वस्यानो
प्रसिद्धिः रसच्चान्यत्वाभाववत्त्वनिरूपितत्वेनापि साध्यसामान्यीयप्रतियोगितावच्छेदकताया
श्च घटत्वान्योन्याभाववान् घटत्वाभावादित्यादौ अव्याप्त्यापत्तेः तादृशस्य सर्वस्यापि निरुक्तसा
ध्याभाववद्वृत्तिः साध्यीयः प्रतियोगितावच्छेदकत्वात् यद्वा साध्यतावच्छेदकसंबन्धावच्छिन्नसा
ध्याभाववद्वृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकतान्यतादृशावच्छेदकसंबन्धेन स्वसा
ध्याभावाधिकरणत्वं विवक्षणीयम् वृत्त्यनवच्छेदकतामन्यतरविशेषणं एव च घटान्योन्याभाववान्
घटत्वादित्यादौ साध्याभाववद्घटत्वादेः साध्यप्रतियोगित्वविरहेऽपि न क्षतिः तादृशान्यत
रस्य प्रतियोगितावच्छेदकत्वस्यावश्यकत्वात् न च तथापि कपिसंयोगी एतद्वृक्षत्वादित्यादा
व्याप्यवृत्ति साध्यकसद्धेतावव्याप्तिरिति वाच्यम् निरुक्तसाध्याभावत्वविशिष्टनिरूपिता

५

पादिवृत्तिकसंसर्गकनिरवच्छिन्नाधिकरणतानिरूपकप्रत्ययावृत्तित्वस्य विवक्षितत्वात् गगनकर्मसाध्यकविशिष्टस
त्ता——वान् गगनत्वादित्यादौ सत्तात्मकसाध्याभाववदधिकरणत्वस्य गगनवृत्तित्वेऽपि साध्याभा
ववत्त्वविशिष्टनिरवच्छिन्नाधिकरणत्वस्य गगनाद्यवृत्तित्वान्नाव्याप्तिः नचैवं कपिसंयोगाभाववा
न् गगनत्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याव्याप्तिरिति वाच्यम् केव
लान्वयिन्यभावादित्यनेन गगनकर्मत्वे वा रूपदोषस्य वक्ष्यमाणत्वात् नचतथापि संयोगिभिन्नं गगनत्वादित्या
दौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्याव्याप्तिः अन्योन्याभावस्याव्याप्यवृत्तित्वेनिय
मवादिनये तस्य केवलान्वयित्वेन गगनत्वादित्यादि वाच्यम् अन्योन्याभावस्याव्याप्यवृत्तित्वनियमवा
दिनये अन्योन्याभावात्यन्ताभावस्य प्रतियोगितावच्छेदकरूपेणैव व्याप्यवृत्तिमदन्योन्याभा
वाभावस्याव्याप्यवृत्तिरूपस्यापि स्वीकृतत्वाभ्युपगमात् तत्राग्रे स्फुटीभविष्यति ननु तथापि समवायादि
नादि हेतुके ऽदं वह्निमान् गगनादित्यादौ वाचनव्याप्तिः वह्न्यभाववति हेतुतावच्छेदकसमवायसंबन्धेन ग
गनादेरवृत्तेः नचेत्तद्वयमेव हेतुतावच्छेदकसम्बन्धेन पक्षधर्मताभावात्सद्धेतुत्वव्यवहार इति

वाच्यम् न चापि व्याप्तिग्रहे गौरवात् किंतु भवति उक्तत्वात् अन्यथा धूमवान् वह्नेरित्यादावपि लक्षणस्य
६ सत्त्वात् एवं च गुणकर्मान्यत्वविशिष्टसत्त्वात् इत्यादावव्याप्तिः विशिष्टसत्त्वस्य केवलसत्ता
नतिरिक्ततया द्रव्यत्वाभाववत्यपि गुणादौ तस्य वृत्तेः गुणे गुणकर्मान्यत्वविशिष्टसत्ता इति प्रतीतेः
सिद्धत्वात् एवं सत्तावान् द्रव्यत्वादित्यादौ चाव्याप्तिः सत्ताभाववति सामान्यादौ हेतुतावच्छेदकसमवा
यादिसंबंधेन वृत्तेरप्रसिद्धेरिति चेन्न हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणताप्रतियोगिकहेतुता
वच्छेदकसंबंधावच्छि — धेयतानिरूपितत्वविशेषणताविशेषसंबंधेन निरुक्तसाध्याभाव
त्वविशिष्टनिरूपितनिरूढत्वे संयोगेन वह्न्यधिकरणतानां स्वरूपवृत्तित्वसामान्याभावस्याक्ष
तत्त्वात् इति स्वनिष्ठहेतुतावच्छेदकसंबंधेन वह्न्यधिकरणताप्रसिद्धत्वाच्च सत्तावान् द्रव्यत्वादित्यादौ सत्ताभावा
धिकरणतावद्वृत्तित्वस्य हेतुतावच्छेदकसंबंधावच्छिन्नाधेयतानिरूपितत्वविशेषणताविशेषसं
बंधेन सामान्याभावो द्रव्यत्वादौ समवायसंबंधावच्छिन्नाधेयतानिरूपितत्वविशेषणताविशे
षसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावाधिकरणतावद्वृत्त्यभावस्याप्यधिकरणासंबंधा ६

वह्नित्वाभाववत्पर्वतसंयोगसंबंधावच्छिन्नगगनाभावादेरिव केवलान्वयित्वात् द्रव्यं सत्त्वादित्यादेः द्रव्यत्वाभावा
धिकरणगुणादिवृत्तित्वेपि समवायसंबंधावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसंबंधे
नसत्तायास्तत्रानतिव्याप्तिः द्रव्यत्वविशिष्टसत्तावानित्यादौ व्याप्तिवारणाय प्रतियोगिकालत्वमाधेयता
विशेषणतायाम् वस्तुतस्तु एतल्लक्षणकरणे न येविशिष्टसत्त्वविशिष्टनिरूपिताधिकरणतासंबंधेनैव द्रव्यत
त्वाभावं न तु समवायसंबंधेन तथा च प्रतियोगितावच्छेदकतानमाधेयताविशेषणत्वम् एतादृशमेव तदुपा
दानेन हेतुतावच्छेदकभेदेन कार्यकारणभावभेदापत्तेः हेतुतावच्छेदकसंबंधेन च संबंधित्वे
सतिरन्यत्वेनान्यविशेषणतावच्छिन्नमान् गगनादित्यादौ नातिव्याप्तिः ननु तथापि अभावत्वेऽ
वच्छेदपर्याप्तमत्वेकत्वेति मिश्रानां रे घटत्ववान् घटत्वतदभाववदुभयत्वादित्यादौ पर्याप्त्याख्या
संबंधेन उभयत्वे हेतुकेऽतिव्याप्तिः घटत्वाभाववति हेतुतावच्छेदकपर्याप्त्याख्यसंबंधेन हेतो
रवृत्तेः घटो घटपटोभयमितिवत् घटो घटत्वतदभाववदुभयमित्यप्रतीतेः इति चेन्न तादृशप
मिश्रानां रे हेतुतावच्छेदकसंबंधेन साध्यासमानाधिकरणत्वे सतीत्यनेन विशेषणीयत्वात्

त्ति अन्यतवोक्तमणिनिविष्टतान्यावृत्तिमत्वं साध्यासमानाधिकरणत्वं वेति केवलान्वयिगन्तव्ये दीधितिकृता
केचित्तु निरुक्तसाध्याभाववत्त्वविशिष्टहेतुनिरूपितताया विशेषणताविशेषसंबंधेन गुणात्मसंबंधेनवाति
रवच्छिन्नाधिकरणताताद्रात्म्यपर्याप्त्यवर्तमानमतुभावावच्छिन्नहेतुतावच्छेदकसंबन्धावच्छिन्नाधिकर
णत्वसामान्यं तद्धर्मवत्त्वं विवक्षितम् धूमवान् वह्नेरित्यादौ पर्वतादिनिष्ठवह्न्यधिकरणताया वह्नेर्धू
माभावाधिकरणत्ववदवृत्तित्वेपि अयोगोलकनिष्ठवह्न्यधिकरणताव्यक्तेरतथात्वान्नातिव्या
प्तिरित्याहुः अन्ये तु हेतुतावच्छेदकसंबंधावच्छिन्नस्वाधिकरणताप्रयवृत्तित्वनिरवच्छिन्नाधिकरणत्वा
वृत्तित्वनिरुक्तसाध्याभाववृत्तवैशिष्ट्यनिरूपिततया व्याप्तसमसंबंधावच्छिन्नाधिकरणतात्वकत्वमिति विशे
ष्यविशेषणताव्यत्यासेनान्वयेप्यस्य पदे हेतुरूपरस्य व्यावर्त्तकस्य संयोगाभावोवान् सत्वात् कपिसं
योगिभिन्नगुणत्वादित्यादावपि नाव्याप्तिरित्याहुरिति संक्षेपः लक्षणान्तरमाह साध्यवद्भिन्ने
ति साध्यवद्भिन्नेत्यत्र साध्याभाववान् तदवृत्तित्वमर्थः कपिसंयोगी एतद्वृक्षत्वादित्यादावव्या
प्यवृत्तिसाध्यककाव्याप्तिवारणाय साध्यवद्भिन्नेति साध्याभाववतो विशेषणमिति भाव्यं

ल्लदृत्तेन साध्याभाववद्वृत्तित्वस्याव्याप्त्यापत्तेः साध्यवद्भिन्नावृत्तित्वमित्यस्यैव सम्यक्त्वात् न व्याप्तत्साध्य
वद्भिन्नो यः साध्याभावः तद्वदवृत्तित्वमिति समनीतमुक्तमेव परमर्थः तथाच साध्यवद्भिन्नवृत्ति
यः साध्याभावस्तद्वदवृत्तित्वमर्थः एवं च साध्यवद्भिन्नवृत्तीत्यनुक्तौ संयोगी द्रव्यत्वादित्यादिसा
दावव्याप्तिः संयोगाभाववति द्रव्ये द्रव्यत्वस्य वृत्तेः तदुपादाने च संयोगवद्भिन्नवृत्तिसंयोगाभावः
गुणादिवृत्तिसंयोगाभाव एवाधिकरणभेदेनाभावभेदात् तद्वदवृत्तित्वान्नाव्याप्तिः न च त
त्रापि साध्यवद्भिन्नावृत्तित्वमेवास्तु किं साध्याभाववद्वृत्तित्वेनेति वाच्यम् यथाश्रुतलक्षणे
तस्याप्रवेशेन वैयर्थ्याभावात् तस्यापि लक्षणान्तरत्वात् न च तत्रापि साध्यवद्भिन्नवृत्तिर्यस्त
द्वदवृत्तित्वमेवास्तु किं साध्याभावपदेनेति वाच्यम् तदा द्रव्यत्वादिमद्वृत्तित्वात् संभवापत्तेः साध्या
भाववत्त्वं तु साध्यभेदमपि तत एव द्रव्यत्वादेरपि द्रव्यत्वाभावाभाववत्त्वात् भावरूपाभावस्यापि
करणभेदेन भेदाभावात् ननु तथापि घटाकाशसंयोगवदन्यत्वान्यतमाभाववान् गगनत्वा
दित्यत्र घटानधिकरणदेशावच्छिन्नघटाकाशसंयोगाभावस्य गगने सत्त्वात्सद्धेतावव्याप्तिः

साध्यवद्भिन्नवृत्तेर्वह्न्यभावस्य साध्याभावस्य वृत्तेः कपिसंयोगाभावस्य गगने सत्त्वात् तत्र चैतद्धेतोर्वृत्तेः
न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववत्त्वविवक्षितमिति वाच्यम् साध्याभावपदस्य वैयर्थ्य
र्थ्यापत्तेः साध्यवद्भिन्नवृत्तित्वविशिष्टस्य वदवृत्तित्वस्यैव सम्यक्त्वात् इति चेन्न अभावाभावस्याति
रिक्तत्वे मते तेन रूपेण तत्करणात् तथा चाधिकरणभेदेनाभावभेदात् साध्यवद्भिन्ने वृत्तेर्वह्न्यव
त्त्वमानस्य साध्याभावस्य प्रतियोगिमति गगने सत्त्वाद् व्याप्त्यभावात् न च साध्याभावत्वस्य साध्यपद
वैयर्थ्यम् अभावाभावस्यातिरिक्तत्वे न द्रव्यत्वादेरभावाभावाभावात् साध्या[...]वद्वृत्तित्वघ
टाभावाद्धेतोर्हेतुमति सत्त्वात् अधिकरणभेदेनाभावभेदादिति वाच्यम् एवं प्रतियोगिस
मानाधिकरणत्वप्रतियोगिव्यधिकरणत्वलक्षणविरुद्धधर्माध्याससत्त्वे वाधिकरणभे
देनाभावभेदस्यानुपगमात् अत एव सर्वत्र तथा च साध्यवद्भिन्नवृत्तित्वघटाभावादि हेतुमत्यपि सत्त्वात् अ
संभवात् तेन साध्यपदोपादानात् एतावता कपिसंयोगवद्भिन्नवृत्तित्वघटाभावाभावो ऽतिरिक्तः
कपिसंयोगवद्भिन्नवृत्तीनामनन्तानां यावत्त्वस्यैव क्रमशः सत्त्वात् घटत्वेन यावता घमा ८

कभावत्वस्यातिरिक्तत्वेप्यव्याप्यवृत्त्यत्वादीनां गगनावृत्तित्वात् न चैवं प्रमेयत्वादिमादायासम्भववारणाय सा
ध्यपदमिति प्राहुरित्यास्तामतिविस्तरः ॥ साध्यवत्प्रतियोगिकान्योन्याभाववति हेतौ साध्यवत्प्रतियोगिका
न्योन्याभावाधिकरणावृत्तित्वाभाव इत्यत्रान्योन्याभावस्य प्रतियोग्यवृत्तित्वेन विशेषणीयः ते
न साध्यवती व्याप्यत्वस्य वह्नित्वधर्मावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतावृत्तित्वविरहेणासम्भ
वः नन्वेवमपि नानाधिकरणसाध्यकवह्निमान् धूमादित्यादौ साध्याधिकरणीभूततत्तद्व्यक्तित्वाव
च्छिन्नप्रतियोगिताकान्योन्याभाववति हेतौ वृत्तेरव्याप्तिर्दुर्वारा प्रतियोग्यवृत्तित्वमपहाय साध्यतावा
वच्छिन्नप्रतियोगिताकान्योन्याभाववित्वेनोपवर्णनेऽपि नहि क्षतिरिति चेन्न वक्ष्यमाणकेवला
न्वय्यव्याप्तिवदस्यापि अत्र दोषत्वात् न च तथापि साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैवेह लक्षण
घटकत्वे वक्ष्यमाणकेवलान्वय्यव्याप्तिरत्रासंगता केवलान्वयिसाध्यके साध्याधिकरणीभूततत्तद्व्यक्तित्वा
वच्छिन्नान्योन्याभाववत्त्वप्रसिद्धत्वादिति वाच्यम् तथापि तादृशान्योन्याभावस्य प्रसिद्धत्वेऽपि तद्वति हेतौ वृत्ते
रव्याप्तेर्दुर्वारत्वात् यद्वा साध्यवत्प्रतियोगिकान्योन्याभावपदेन साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाव

८ एवंविशिष्टान्तर्नचैवंपक्षसाध्यभेदः तत्रसाध्यवत्ताभावावच्छिन्नप्रतियोगिताकान्योन्याभाववत्त्वेनप्रवेशेतत्तत्त्वावच्छिन्नान्यो
न्याभावाधिकरणत्वेनैतत्त्याधिकरणत्वप्रवेशात्पूर्वोक्तव्याप्तिभेदात्स्वावच्छेदकतया घनाधिकरणा
त्वाशस्यवैयर्थ्यमिति नकोपिदोषः इत्यादिकसकलेतिसाकल्यसाध्याभाववतोविशेषणम् तथाचयावन्तिसा
ध्याभावाधिकरणानितन्निष्ठाभावप्रतियोगित्वम् हेतोर्व्याप्तिरित्यर्थः धूमाद्यभाववद्घटादिनिष्ठाभावप्रति
योगित्वाद्धूमादावतिव्याप्तिर्यावदिति साध्याभाववतोविशेषणम् साध्याभाववविशेषणत्वेह्रदादिवृत्तित्वा
दिरूपेणान्योन्याभावस्यापिसकलसाध्याभावेप्रवेशानावदधिकरणाप्रसिद्ध्यासम्भवापत्तेः नच
द्रव्यंसत्त्वादित्यादौद्रव्यत्वाभाववतिगुणादौसत्त्वादेर्विशिष्टाभावादिसत्त्वादेरव्याप्तिरितिवाच्यम् नाह
शाभावप्रतियोगितावच्छेदकेहेतुतावच्छेदकत्वस्येहविवक्षितत्वात् प्रतियोगिताचहेतुतावच्छेदकसम्बं
धावच्छिन्नाग्राह्या तेनद्रव्यत्वाभाववतिगुणादौसत्तादेः संयोगादिसंबंधावच्छिन्नाभावसत्त्वेपिनाति
व्याप्तिः साध्याभावश्चसाध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकोबोध्यः
अन्यथापर्वतादेरपिवह्न्यादेर्विशिष्टाभावादिमत्त्वेनसमवायादिसंबंधावच्छिन्नवह्न्यादिसामान्या
भाववत्त्वेनचसाध्याववदंतर्गतत्वात्तन्निष्ठाभावाप्रतियोगित्वाभावात् धूमस्यासम्भवस्यात्त्वच७ ८

कपिसंयोगी एतद्वृक्षत्वादित्यादौ वृक्षस्यापि तादृशाभाववत्त्वेन यावदन्तर्गततया तन्निष्ठाभावाप्रतियो
गित्वादेतद्वृक्षत्वस्याव्याप्तिरिति वाच्यम् किञ्चिदनवच्छिन्नायाः साध्याभावाधिकरणताया एव विव
क्षितत्वात् इत्थञ्च किञ्चिदनवच्छिन्नायाः कपिसंयोगाभावाधिकरणताया गुणादावेव सत्त्वात्त
त्र च हेतोरभावसत्त्वान्नाव्याप्तिः न च कपिसंयोगाभाववान् सत्त्वादित्यादौ साध्याभावस्य क
पिसंयोगादेर्निरवच्छिन्नाधिकरणत्वाप्रसिद्ध्याव्याप्तिरिति वाच्यम् केवलान्वयिन्यभावा इत्य
नेनास्य पक्षेऽनेनैव एतद्दोषस्य वक्ष्यमाणत्वात् न च पृथिवीत्ववान् कपिसंयोगादित्यादौ पृथिवीत्वाभा
ववति यावत्येव कपिसंयोगाभावसत्त्वादव्याप्तिरिति वाच्यम् तन्निष्ठपदेन तत्र निरवच्छिन्नत्व
वृत्तिमत्त्वस्य विवक्षितत्वात् तच्च पृथिवीत्वाभावाधिकरणजलादौ यावदन्तर्गते निरवच्छिन्नवृत्ति
मान् भावो न कपिसंयोगाभावः किन्तु घटत्वाभाव एवेत्यत्रेत्ययोगात्तस्य हेतावसत्त्वान्ना
व्याप्तिः न चैवं अन्योन्याभावस्याव्याप्यवृत्तित्वनियमवादिनये द्रव्यत्वाभाववान् सं
योगवद्भिन्नत्वात् इत्यादेरपि सद्धेतुतया तत्राव्याप्तिः संयोगावच्छिन्नभिन्नत्वाभावस्य

संयोगसम्बन्धावच्छिन्नवृत्तितमसिद्धेरितिवाच्यम् अन्योन्याभावस्याव्याप्यवृत्तित्वनियमवादिनये
१० ऽन्योन्याभावस्याभावोऽनन्यप्रतियोगितावच्छेदकरूपः किंतु अतिरिक्तोऽव्याप्यवृत्ति अन्यथा
मूलावच्छेदेन कपिसंयोगिभेदाभावानामनुपपत्तेरिति संयोगवद्भिन्नत्वाभावस्यापि निरवच्छि
न्नवृत्तिमत्त्वात् वस्तुतस्तु सकलपदमज्ञापेक्षया दूनत्वेनैकपरमन्यथा एतद्घटत्वाभाववान् घट
त्वात् इत्येकव्यक्तिके साध्याभावाधिकरणस्याप्रसिद्ध्याऽव्याप्त्यापत्तेः किंचिदन्तर्भाव्येकत्वा
पत्तिः कुत्र साध्याभावाधिकरणमपि अव्यापकीभूतो योऽभावः हेतुतावच्छेदकसंबंधावच्छिन्न
न प्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वलक्षणार्थः नच सत्त्वादिसामान्याभावस्यापि
प्रमेयत्वादिनानिरूपितसाध्याभावाधिकरणाव्यापकत्वात् एवं सत्त्वादेर्न्यायादावतिव्याप्तिः
न तु वह्निन्नहृदान्योन्याभावप्रतियोगितानवच्छेदकतया व्यापकत्वमित्युक्तेर्नतु धूमवत्त्वस्याव्याप्य १०
यत्ने वह्निमत्त्वादित्यादावव्याप्तिरिति वह्नित्वाभावानां वह्निव्यक्तीनां सर्वासामेव चालनीयन्या
येन तत्र धूमवत्त्वव्याप्याभावाधिकरणतावन्निन्नहृदान्योन्याभावस्य प्रतियोगितावच्छेदकत्वात्

द्वितीयाञ्चाम् तादृशाधिकरणताव्यापकतावच्छेदकं हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्ना
भावत्वं तद्धर्मवत्त्वस्य विवक्षितत्वात् व्यापकतावच्छेदकत्वं तेन हृद्विशान्यतमाभावप्रतियोगि
तावच्छेदकत्वं नन्वेतद्वह्नि प्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेन तद्
त्तिमिन्नवह्नि नवह्निमानयोऽभावसत्त्वेनैतत्तानवच्छेदकत्वं वा प्रकृतव्यापकतायां प्रति
योगिवैयधिकरण्यस्यानिरवच्छिन्नत्वस्य वा प्रवेशे प्रयोजनविरहात् ननु पृथिवी कपिसंयो
गादित्वादित्यत्राव्याप्तिः कपिसंयोगाभावत्वस्यानिरूपितव्यापकतावच्छेदकत्वविरहात् इ
ष्टेव परमार्थः साध्यवदन्येति अत्रापि पूर्ववल्लक्षणे ऽकारीत्याश्लेषे तौ साध्यवदन्यवृत्तित्वविरहः
इत्यर्थः तादृशावृत्तित्वाभावश्च तादृशावृत्तित्वसामान्याभावो बोध्यः एवञ्च तृतीयलक्षणाद्
भेदस्तस्याकृम्भधस्तात् तेन धूमवान् वह्नेरित्यादौ धूमवदन्यजलहृदवृत्तित्वस्य धूमवदन्य
वृत्तित्वजलत्वोभयाभावस्य वह्नौ सत्त्वेऽपि नातिव्याप्तिः साध्यवदन्यत्वं च अन्योन्याभावत्वेन
रूपेण तादृशावच्छिन्नावच्छिन्नप्रतियोगिताकाभाववत्त्वम् तेन वह्निमान् धूमादित्यादौ न तत्र ह्रदक्रि

११ मदन्यस्मिन्धूमादेर्वृत्तावपिनाव्याप्तिः नावावह्निमत्तावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य स्वा
वच्छिन्नभिन्नभेदस्याधिकरणे पर्वतादौ धूमस्य वृत्तेरव्याप्तिस्तस्य साध्यवत्तावच्छि
न्नप्रतियोगितायाः शून्यताभाववत्त्वनिरूपितत्वेनान्योन्याभाववत्त्वनिरूपितत्वविरहात् प्र
मेयोऽन्योन्याभाववत्त्वनिरूपितत्वञ्च तादात्म्यसंबन्धावच्छिन्नत्वमेव साध्यवत्त्वम् साध्यतावच्छेदकसं
बंधेन बोध्यम् तेन वह्निमान् धूमादित्यादौ वह्निमत्त्वावच्छिन्नप्रतियोगिताकस्य समवायेन व
ह्निमतोऽन्योन्याभावस्याधिकरणे पर्वतादौ धूमादेर्वृत्तावपिनाव्याप्तिः सर्वमन्यत् पूर्वव
त्तेनैवाक्रमेणावसेयम् इति समासः सर्वाण्येव लक्षणानि केवलान्वयिन्यव्याप्त्या दूषयति केवला
न्वयिन्यभावादिति पंचानामेव लक्षणानामिदं वाच्यं ज्ञेयत्वादित्यादिव्याप्यवृत्तिकेवलान्व
यिसाध्यके द्वितीयादिलक्षणचतुष्टयस्य तु कपिसंयोगाभाववान् सत्त्वादित्यादौ अव्या
प्यवृत्तिकेवलान्वयिसाध्यके चाभावादित्यर्थः साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यता
वच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्ता ११

वच्छिन्नप्रतियोगिताकान्योन्याभावस्याप्रसिद्धत्वात् कपिसंयोगाभाववान् सत्त्वादित्यादौ निरवच्छि-
१२ न्नसाध्याभावाधिकरणत्वस्याप्रसिद्धत्वाच्चेति भावः तृतीयलक्षणस्य केवलान्वयिसाध्य-
कत्वं च तद्व्याख्यानावसरे एव प्रपञ्चितम् एतच्चोपलक्षणम् द्वितीये कपिसंयोगी ए-
एतद्वृक्षत्वादित्यादावव्याप्तिः अधिकरणभेदेनाभावभेदे मानाभावेन कपिसंयोगवद-
भिन्नवृत्तिकपिसंयोगाभावोऽव्याप्यवृत्तिः कपिसंयोगाभावोऽपि तद्वृक्षवृत्तित्वादेतद्वृक्षत्व-
स्य न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववदवृत्तित्वं वक्तव्यम् एवं वृक्षत्वस्य वि-
शिष्टाधिकरणत्वाभावादेव नाव्याप्तिरिति वाच्यम् साध्याभावपदवैयर्थ्यापत्तेः साध्य-
वदभिन्नवृत्तित्वविशिष्टसाध्यवदवृत्तित्वस्यैव सम्यक्त्वात् सद्धेतौ हेत्वधिकरणविशिष्टाधिक-
रणत्वाभावाद्वाऽसम्भवाभावात् तृतीये साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्य लक्षणघ-
टकत्वे चालनीयन्यायेनान्योन्याभावमादाय नानाधिकरणसाध्यके च वह्निमान् धूमादि-
त्यादावपि व्याप्तिरस्त्वेवेत्यपि बोध्यम् ॥ इति श्रीमणिव्याख्यायां माथुर्यां पञ्चलक्षणम् ॥ सम्वत् १८३२ १२

पंचलक्षणी
मिन्न पृ० ल० अ० १६ पं० प्र० पृ०

ह० ल०